# अधोलिखितपत्रं

**1. भवान् रमेशः स्वकीयं पितरं प्रति स्वाध्यायविषये अधोलिखितपत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत--**

**सम्यक, अस्माकम्, भृशम्, विहाय, सादरम्, अन्यत्, न्यूनताम्, मातरम् ।**

जामनगरतः

दिनाङ्काः 18 मार्च 20xx

परमपूजनीयेषु पितृचरणेषु (i)............... प्रणतयः सन्तु। भवतां पत्रमधिगतम्। समाचारान् अधीत्य मे मनः (ii) .................. मोदतेतराम् । मईमासे (iii)................ परीक्षा सम्पत्स्यते । सम्प्रति अध्ययनकर्म (iv) ...............चलति। संस्कृतव्याकरणं (v) ............... सर्वेषु विषयेषु दक्षतामापन्नोऽस्मि। व्याकरणस्यापि (vi)............................ शीघ्रमेव अपनेष्यामि, (vii) ........... प्रति मे सादरं प्रणतयः। (viii).................. कुशलम्।

भवत्कः सुतः

रमेशः

**उत्तरम्–**

जामनगरतः

दिनाङ्काः 18 मार्च 20xx

परमपूजनीयेषु पितृचरणेषु सादरं प्रणतयः सन्तु । भवतां पत्रमधिगतम्। समाचारान् अधीत्य मे मनः भृशं मोदतेतराम्। मईमासे अस्माकं परीक्षा सम्पत्स्यते सम्प्रति अध्ययनकर्म सम्यक चलति। संस्कृतव्याकरणं विहाय सर्वेषु विषयेषु दक्षतामापन्नोऽस्मि । व्याकरणस्यापि न्यूनतां शीघ्रमेव अपनेष्यामि, मातरं प्रति मे सादरं प्रणतयः । अन्यत् कुशलम्।

भवत्कः सुतः

रमेश:

**2. भवान गोविन्दः । स्वकीयं मित्रं राजेन्द्रं प्रति स्वविद्यालयस्य वार्षिकोत्सवविषये अधोलिखितपत्र मंजूषापदसहायतया पूरयित्वा लिखतु। ।**

**परिवारे, वार्षिकोत्सवस्य, पत्रोत्तरं, स्वकरकमलेन, कुशलताम्, विविधाः, स्वीकृतवान् पुरस्कारम् ।**

शैलपुरतः

दिनांक:-17.12.2020

प्रियमित्रं राजेन्द्र।

नमस्ते।

अत्र अहं कुशलं, भवतः.......................कामये। फरवरी मासे पंचमे दिनांके मम विद्यालये..... आयोजनम् अभवत्। अस्मिन् दिवसे.....................प्रतियोगिताः अभवन् । अहमपि धावनप्रतियागितायां, वादविवादप्रतियोगितायां च भाग.............................। पुरस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः..........................पुरस्कारवितरणं कृतवान्। अहमपि........... ..............प्राप्तवान्।

अस्तु........................सर्वेभ्यः यथायोग्यं नमस्काराः.................शीघ्रमेव प्रेषणीयम्।

भवतः मित्रम्

गोविन्दः

**उत्तरम्-**

शैलपुरतः

दिनांकाः 17.12.20xx प्रियमित्रं राजेन्द्र!

नमस्ते।

अत्र अहं कुशलं, भवतः कशलतां कामये। फरवरी मासे पञ्चमे दिनांके मम विद्यालये वार्षिकोत्सवस्य आयोजनम् अभवन् । अस्मिन् दिवसे विविधाः प्रतियोगिताः अभवन्। अहमपि धावनप्रतियोगितायां, वादविवादप्रतियोगितायां च

भागं स्वीकतवान। परस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः स्वकरकमलेन पुरस्कारवितरणं कृतवान् । अहमपि पुरस्कार प्राप्तवान्।

अस्तु परिवारे सवेभ्यः यथायोग्य: नमस्काराः पत्रोत्तरं शीघ्रमेव प्रेषणीयम।

भवतः मित्रम्

गोविन्दः

**3. भवान् देवदत्तः। स्वानुजं यज्ञदत्तं प्रति अधोलिखितपत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत--**

**अध्ययने, चिन्ता, तवाग्रजः, पत्रोत्तरं, नीरोगताम्, प्रसन्नाश्च, धनादेशः, चिरात्**

जयपुरनगरात्

दिनांका: 20/03/20xx

प्रिय अनुज यज्ञदत्त!

शुभाशिषः।

अत्र कुशलं तत्रास्तु।

पत्रं तव नैवाऽऽगतम्। तवाध्ययनं सम्यगेव चलतीति मन्ये । मया प्रेषितो................ लब्धो न वा? अत्रत्याः सर्वे जनाः स्वस्थाः ....... सन्ति । पूर्वं मातुः स्वास्थ्यं समीचीनं नासीत् परमिदानीं ..... ........... अनुभवति। अतः मातुः विषयेऽपि .............. सावधानतया वर्तनीयम्। .................. शीघ्रमेव देयम्, पत्रप्रेषणे प्रमादो नैव कर्तव्यः। तव स्नेहपत्र-प्रतीक्षायाम्।

.................

देवदत्तः

**उत्तरम्---**

जयपुरनगरात्

दिनांकाः 20/03/20xx

प्रिये अनुज यज्ञदत्त!

शुभाशिषः!

अत्र कुशलं तत्रास्तु। चिरात् पत्रं तव नैवाऽऽगतम् । तवाध्ययनं सम्यंगेव चलतीति मन्ये । मया प्रेषितो धनादेशः लब्धो न वा? अत्रत्याः सर्वे जनाः स्वस्थाः प्रसन्नाश्च सन्ति। पूर्वं मातुः स्वास्थ्यं समीचीनं नासीत् परमिदानीं नीरोगताम् अनुभवति। अतः मातुः विषयेऽपि चिन्ता न कर्तव्या। अध्ययने

सावधानतया वर्तनीयम्। पत्रोत्तरं शीघ्रमेव देयम्, पत्रप्रेषणे प्रमादो नैव कर्त्तव्यः । तव स्नेहपत्र-प्रतीक्षायाम्।

तवाग्रजः

देवदत्तः

**4. भवान् राजवीरः। भवतः विद्यालये वार्षिकोत्सवे संस्कृत नाटकस्य मञ्चनम् भविष्यति। तदर्थं स्व मित्रम् राजपालं प्रति लिखितं निमंत्रणपत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत।**

**द्रष्टुम्, अग्रजेभ्यः, रूपनगरतः, कुशली, मञ्चनम्, राजपाल!, करिष्यामि, उत्साहवर्धनम्**

किसान छात्रावासः

.........................

दिनाङ्काः 10-02-20xx

प्रिय मित्र .................

अत्र सर्वगतं कुशलम् अस्ति। मन्ये भवान् अपि .................. इति। अस्माकं विद्यालयस्य वार्षिकोत्सवे, "रमणीया हि सृष्टिः एषा" इति नाटकस्य ................. भविष्यति । अहं तस्मिन् नाटके काकस्य अभिनयं ..................। भवान् अवश्यमेव तत् .................. आगच्छतु। मम अपि .................. भविष्यति। सर्वेभ्यः .................. मम प्रणामाञ्जलिः निवेद्यताम्। इति।

भवतः मित्रम्

राजवीरः

**उत्तरम्--**

किसान-छात्रावासः

रूपनगरतः

दिनांकाः 10-02-20xx

प्रिय मित्र राजपाल!

अत्र सर्वगतं कुशलम् अस्ति । मन्ये भवान् अपि कुशली इति। अस्माकं विद्यालयस्य वार्षिकोत्सवे, "रमणीया हि सृष्टिः एषा" इति नाटकस्य मञ्चनं भविष्यति। अहं तस्मिन् नाटके काकस्य अभिनयं करिष्यामि। भवान् अवश्यमेव तत द्रष्टुम् आगच्छतु। मम अपि- उत्साहवर्धनं भविष्यति। सर्वेभ्यः अग्रजेभ्यः मम प्रणामाञ्जलिः निवेद्यताम् । इति।

भवतः मित्रम्

राजवीरः

**5. पराक्षाया सफलतायै स्वमित्रं प्रदीपकमारं प्रति अधोलिखितमपूर्ण वर्धापन्नपत्रं मजषायां प्रदत्तपदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत।।**

**सुहृद्वर्य, प्रणाम, जयपुरतः, कुशलं, वर्धापन, एवमेव, परीक्षायाम्, अधिगतवान्**

.......................

दिनाङ्काः 18.12.20xx

अभिन्नहृदय,

सप्रेम नमस्ते।

अत्र

................. तवास्तु। अद्यैव तव पत्रं प्राप्तम्। त्वं प्रथम-श्रेण्यां ................ उत्तीर्य योग्यता-सूच्या प्रथम स्थानम् .................. इति पठित्वा हर्षमनुभवामि। तव प्रयासः सर्वथा साधुवादाहः। मम .................. (बधाई) स्वीकरोतु । आशासे अग्रेऽपि ................... स्तुत्यप्रयासं करिष्यति ।

स्वपितृभ्यां मम .................. निवेदय।

तव स्निग्धं मित्रम्

हरीशः

**उत्तरम्—**

जयपुरतः

दिनाङ्काः 18.02.20xx.

अभिन्नहृदय सुहृद्वर्य!

सप्रेम नमस्ते।

अत्र कुशलं तत्रास्तु। अवैव तव पत्रं प्राप्तम्। त्वं प्रथम-श्रेण्यां परीक्षायाम् उत्तीर्य योग्यता-सूच्यां प्रथमं स्थानम् अधिगतवान् इति पठित्वा हर्षमनुभवामि। तव प्रयासः सर्वथा साधुवादार्हः। मम वर्धापन्नं (बधाई) स्वीकरोतु । आशासे अग्रेऽपि , एवमेव स्तुत्यप्रयासं करिष्यति।

स्वपितृभ्यां मम प्रणाम निवेदय ।

तव स्निग्धं मित्रम्

हरीशः

**6. भवान सरेशः। मातरं प्रति अधोलिखितं पत्रं मञ्जूषापद सहायतया लिखत।**

**वार्षिकोत्सवः, अभिनयम्, मुख्यातिथिः, कुशलम्, अध्ययनम्, पितरम्, भवदीयः, सर्वेभ्यः**

चारुनगरात्

दिनांकाः 11/02/20xx

पूजनीयाः मातृचरणाः!

नमोनमः। अत्र ................ तत्रास्तु । मम विद्यालये .................. आसीत् । तत्र अहम् एकम् .................. कृतवान् । मन्त्रिमहोदयः .................. रूपेण आगतवान् । मम .................. सम्यक् चलति । गृहे .................. नमोनमः। अहं .................. प्रणमामि।

सुरेशः

**उत्तरम्—**

चारुनगरात्

दिनांका: 11/02/20xx

पूजनीयाः मातृचरणाः!

नमोनमः। अत्र कुशलं तत्रास्तु। मम विद्यालये वार्षिकोत्सवः आसीत् । तत्र अहम् एकम् अभिनयम् कृतवान्। मन्त्रिमहोदयः मुख्यातिथिः रूपेण आगतवान् । मम अध्ययनम् सम्यक् चलति। गृहे सर्वेभ्यः नमोनमः। अहं पितरम् प्रणमामि।

भवदीयः

सुरेशः

**7. भवती संयोगिता। स्वकीयां सखी मजुं प्रति 'स्वदिनचर्यायाः विषये' अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखतु। |**

**परीक्षा-भवनतः, मञ्जो, संध्यादिकं, कुशलिनी, संयोगिता, ज्ञातुम्, अध्ययनं, उत्तिष्ठामि |**

**उत्तरम्---**

परीक्षा-भवनतः

तिथिः 17.03.20xx

प्रिय सखि मञ्जो!

अत्र कुशलं तत्रास्तु। आशासे भवती अपि कुशलिनी। अद्य चिरात तव पत्रं प्राप्य अहं अतीव प्रसन्नास्मि। भवती मम दिनचर्यां ज्ञातुम् इच्छति। अतः लिखामि।

अहम् अत्र पञ्चवादने (प्रातः) उत्तिष्ठामि। सार्धषड्वादनपर्यन्तं स्नानं व्यायाम च करोमि। सप्तवादनतः अध्ययनं पंचलति। दशवादने भोजनं कृत्वा विद्यालयं गच्छामि। सायं पञ्चवादने क्रीडामि। सायं सप्तवादने संध्यादिकं कृत्वा भोजनं करोमि। रात्रौ दशवादनपर्यन्तं पठामि । इत्येवं मम दिनचर्या ।

शेषं कुशलम्।

भवत्याः सखी

संयोगिता

**8. भवती हर्षिता झालरापाटननगरे निवसति।स्वस्य सखीं मनीषां प्रति अधोलिखितमपूर्णपत्रं मञ्जूषायां प्रदत्तपदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत।**

**क्रीडामि, उत्तिष्ठामि, मनीषा, नववादनतः, सखी, झालरापाटनतः, पत्रेण, नमस्ते, विद्यालयं, दिनचर्या, भोजनं, चिरात्, व्यायाम, पठामि, प्रणतिः, कुशलिनौ**

........................

दिनाङ्काः 9-02-20xx

प्रियसखि ...................!

सस्नेहं ............!

अत्र सर्वं कुशलम्।

भवती अपि कुशलिनी इति मम आशा । अद्य .......... तव पत्रं प्राप्य अहमतीव हर्षमनुभवामि। भवती मम ........... ज्ञातुम् इच्छति । अतः तद्विषये लिखामि।

अत्र अहं पञ्चवादने ............. | सार्धपञ्चवादनात् सार्धषड्वादनपर्यन्तं ....... करोमि। ......... अध्ययनं प्रचलति । दशवादने भोजनं कृत्वा ...... गच्छामि। सायं पंचवादने ............. | सप्तवादने संध्यादिकं कृत्वा ....... करोमि। रात्रौ दशवादनपर्यन्तं ........।

गृहे पितरौ स्तः .............| स्वपरिवारे पूज्यजनेभ्यो मम ............. निवेदनीया। यदा कदाचित् ................ वार्ता सूचयतु।

शेषं कुशलम्।

भवदीया प्रिया ...........

हर्षिता

**उत्तरम्---**

झालरापाटनतः

दिनाङ्काः 9-02-20xx

प्रियसखि मनीषा!

सस्नेह नमस्ते!

अत्र सर्वं कुशलम्।

भवती अपि कुशलिनी इति मम आशा। अद्य चिरात् तव पत्रं प्राप्य अहमतीव हर्षमनुभवामि। भवती मम दिनचर्या ज्ञातुम् इच्छति। अतः तद्विषये लिखामि।

अत्र अहं पञ्चवादने उत्तिष्ठामि। सार्धपञ्चवादनात् सार्धषड्वादनपर्यन्तं व्यायाम करोमि। नववादनतः अध्ययनं प्रचलति। दशवादने भोजनं कृत्वा विद्यालयं गच्छामि। सायं पंचवादने क्रीडामि। सप्तवादने संध्यादिकं कृत्वा भोजनं करोमि । रात्री दशवादनपर्यन्तं पठामि।

गृहे पितरौ स्तः कुशलिनौ। स्वपरिवारे पूज्यजनेभ्यो मम प्रणतिः निवेदनीया। यदा कदाचित् पत्रेण वार्ता सूचयतु।

शेषं कुशलम्।

भवदीया प्रिया सखी

हर्षिता

**9. भवान् आदित्यः जयपुरनगरे निवसति। स्वस्य अनुजम् अनुरागं प्रति अधोलिखितमपूर्णपत्रं मञ्जूषायां प्रदत्तपदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखता ।**

**प्रचलति, अनुज, ममाध्ययनं, आदित्यः, जयपुरतः, शीघ्रं, परमात्मनः, गृहमागत्य, आपताये, चिरकालात.स्वाध्ययने. नियमः.चिन्ता, अर्द्धवार्षिकी. सम्प्रति**

.......................

दिनाङ्काः 10-02-20xx

प्रिय...... अनुराग!

शुभाशीर्वादाः।

अत्र सर्व ...........।

तव कुशलतां ......... सर्वदा कामये। ............. तव पत्रं न प्राप्तम्, अतः महती ..................... जायते। पर्व प्रतिमासं कुशलपत्रप्रेषणे तव साधारणो ................... आसीत् । अधुना किं जातमिति नाऽहं जाने। ----पत्रोत्तरं । शीघ्रं प्रेषय।

................. सुचारुरूपेण प्रचलति, दिनत्रयानन्तरं मम................. परीक्षा प्रारब्धा भविष्यति। परीक्षानन्तरमहं शीतकालीनावकाशेषु .................. स्थास्यामि।

तव अध्ययनं सम्यक् ..................न वा। त्वया.............प्रवृत्तिः विधेया। मातृचरणयोरपि ममाभिवन्दनम्। अनुजायै .......... स्नेहाशिषः सूचयतु । पत्रोत्तरमवश्यं.................च प्रेषणीयम्।

भवतः शुभाकाङ्क्षी

................

**उत्तरम्---**

जयपुरतः

दिनाङ्काः 10-02-20xx

प्रिय अनुज अनुराग!

शुभाशीर्वादाः।

अत्र सर्वं कुशलमस्ति।

तव कुशलतां परमात्मनः सर्वदा कामये। चिरकालात् तव पत्रं न प्राप्तम्, अतः महती चिन्ता जायते । पूर्वं प्रतिमासं कुशलपत्रप्रेषणे तव साधारणो नियमः आसीत् । अधुना किं जातमिति नाऽहं जाने। सम्प्रति पत्रोत्तरं शीघ्रं प्रेषय।

ममाध्ययनं सुचारुरूपेण प्रचलति, दिनत्रयानन्तरं मम अर्द्धवार्षिकी परीक्षा प्रारब्धा भविष्यति । परीक्षानन्तरमहं शीतकालीनावकाशेषु गृहमागत्य स्थास्यामि।

तव अध्ययनं सम्यक् प्रचलति न वा। त्वया स्वाध्ययने प्रवृत्तिः विधेया। मातृचरणयोरपि ममाभिवन्दनम् । अनुजायै अर्पितायै स्नेहाशिषः सूचयतु । पत्रोत्तरमवश्यं शीघ्रं च प्रेषणीयम्।

भवतः शुभाकाङ्क्षी

'आदित्यः